# bindumAdhava viShNu stuti

# બિન્દુમાધવવિષ્ણુસ્તુતિઃ

## Document Information

Text title : Bindumadhava Vishnu Stuti

File name : bindumAdhavaviShNustutiH.itx

Category : vishhnu

Location : doc_vishhnu

Transliterated by : Divya K Suresh

Proofread by : Divya K Suresh

Latest update : April 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 23, 2021

*sanskritdocuments.org*

# બિન્દુમાધવવિષ્ણુસ્તુતિઃ

ૐ નમઃ પુણ્ડરીકાક્ષ બાહ્યાન્ત શોચદાયિને ।
સહસ્રશીર્ષાપુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧॥

નમામિ તે પદદ્વન્દ્વં સર્વદ્વન્દ્વનિવારકમ્ ।
નિર્દ્વન્દ્વયાધિયાવિષ્ણો જિષ્ણ્વાદિસુરવન્દિત ॥ ૨॥

યં સ્તોતું નાધિગચ્છન્તિ વાચો વાચસ્પતેરપિ ।
તમીષ્ટેકૈહસ્તોતું ભક્તિસ્રવલીયસી ॥ ૩॥

અપિયો ભગવાનીશો મનઃ પ્રાચામગોચરઃ ।
સમાદૃર્શરલ્પધીભિઃ કથં સ્તુત્યો વચઃ પરઃ ॥ ૪॥

યં વાચો ન વિશન્તીશં મનતીહમનોનયમ્ ।
મનોગિરામતીતં તં કઃ સ્તોતું શક્તિમાન્ભવેત્ ॥ ૫॥

યસ્ય નિઃશ્વસિતં વેદાઃ સષડઙ્ગપદક્રમાઃ ।
તસ્ય દેવસ્ય મહિમામહાન્ કૈરવગમ્યતે ॥ ૬॥

અતન્દ્રિતમનોબુધ્દીન્દ્રિયાયં સનકાદયઃ ।
ધ્યાયન્તોપિહૃદાકાશે ન વિન્દન્તિ યથાર્થતઃ ॥ ૭॥

નારદાદ્યૈર્મુનિવરૈરાબાલબ્રહ્મચારિભિઃ ।
ગીયમાનચરિત્રોઽપિ નસમ્યગ્યોઽધિગમ્યતે ॥ ૮॥

તં સૂક્ષ્મરૂપમજમવ્યયમેકમાદ્યં
 બ્રહ્માદ્યગોચરમજેય મનન્તશક્તિમ્ ।
નિત્યં ચિરામયમમૂર્તમચિન્ત્યમૂર્તિં
 કસ્ત્વાં ચરાચર ચરાવરભિન્ન વેત્તિ ॥ ૯॥

એકૈકમેવ તવ નામ હરેન્મુરારે
 જન્માર્જિતાઘમઘિનાં ચ મહાપદાઢ્યમ્ ।

દદ્યાત્ફલં ચ મહિતં મહતોમખસ્ય
    જપ્તં મુકુન્દ મધુસૂદનમાધવેતિ ॥ ૧૦॥

નારાયણેતિ નરકાર્ણવતારણેતિ
    દામોદરેતિ મધુહેતિ  ચતુર્ભુજેતિ ।
વિશ્વમ્ભરેતિ વિરજેતિ જનાર્દનેતિ
    ક્વાસ્તીહ જન્મજપતાંક્વ કૃતાન્તભીતિઃ ॥ ૧૧॥

યે ત્વાં ત્રિવિક્રમ સદાહૃદિ શીલયન્તિ
    કાદમ્બિનીરૂચિરરોચિષમમ્બુજાક્ષમ્ ।
સૌદામનીવિલસિતાં શુકવી તમૂર્તે
    તેઽપિ સ્પૃશન્તિ તવ કાન્તિમચિન્ત્યરૂપામ્ ॥ ૧૨॥

શ્રીવત્સલાઞ્છન  હરેઽચ્યુતકૈટભારે
    ગોવિન્દ તાર્ક્ષ્ય કેશવ ચક્રપાણે ।
લક્ષ્મીપતે  દનુજસૂદન શાર્ઙ્ગપાણે
    ત્વદ્ભક્તિભાજિ નભયં ક્વચિનસ્તિ પુંસિ ॥ ૧૩॥

યૈરર્ચિતોઽસિ ભગવંસ્તુલસી પ્રસૂનૈ-
    ર્દૂરીકૃતૈણમદસૌરભ દિવ્યગન્ધૈઃ ।
તાનર્ચયન્તિ દિવિ દેવગણાઃ સમસ્તા
    મન્દારદામભિરલં વિમલસ્વમાવાન્ ॥ ૧૪॥

યદ્વાચિનામ તવકામદમબ્જનેત્ર
    યચ્છ્રોત્રયોસ્તવકથા મધુરાક્ષરાણિ ।
યચ્ચિત્તભિત્તિલિખિતં ભવતોઽસ્તિ રૂપં
    નીરૂપભૂપ પદવી નહિતૈર્દુરાપા ॥ ૧૫॥

યે ત્વાં ભજન્તિ સતતં ભુવિશેષશાયિં-
    સ્તાઞ્છ્રીપતેપિતૃ પતીન્દ્રકુબેર મુખ્યાઃ ।
વૃન્દારકા દિવિ સદૈવ સમાજયન્તિ
    સ્વર્ગાપવર્ગ સુખસન્તતિદાનદક્ષ ॥ ૧૬॥

યે ત્વાં સ્તુતવન્તિ સતતં દિવિ તાંસ્તુવન્તિ
    સિદ્ધાપ્સરો મરગણાલસદબ્જપાણે ।
વિશ્રાણયત્યખિલસિદ્ધિદ કો વિના ત્વાં
    નિર્વાણચારુ કમલાં કમલાયતાક્ષ ॥ ૧૭॥

ત્વં હંસિ પાસિ સૃજસિ ક્ષણતઃ સ્વલીલા
    લીલાવપુર્ધર વિરિઞ્ચિનતાઙ્ઘ્રિયૂગ્મ ।
વિશ્વં ત્વમેવ પરવિશ્વયતિસ્ત્વમેવ
    વિશ્વસ્યબીજમસિ તત્પ્રણતોઽસ્મિનિત્યમ્ ॥ ૧૮॥

સ્તોતાત્વમેવ દનુજેન્દ્રરિપોસ્તુતિસ્ત્વં
    સ્તુવ્યસ્ત્વમેવ સકલં હિ ભવાનિહૈકઃ ।
ત્વત્તો ન કિઞ્ચિદપિ ભિન્નમવૈમિ વિષ્ણો
    તૃષ્ણાં સદા કૃણુહિ મે ભવજામ્ભવારે ॥ ૧૯॥

ઇતિ સ્તુત્વા હૃષીકેશમગ્નિબિન્દુર્મહાતપાઃ ।
તસ્થૌ તૂષ્ણીં તતો વિષ્ણુરુવાચ વરદો મુનિમ્ ॥

ઇતિ બિન્દુમાધવવિષ્ણુસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Divya K Suresh

*bindumAdhava viShNu stuti*

pdf was typeset on April 23, 2021

Please send corrections to *sanskrit@cheerful.com*